# श्रीकनकधारास्तोत्रम्

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥ १ ॥

ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षः स्थलनित्यवासरसिकां तत्क्षान्तिसंवर्धिनीम् ।
पद्मालङ्कृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥ २ ॥

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ॥ ३

आविर्भावः कलशजलधावध्वरे वाऽपि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।
भूमौ यस्या भुवनमखिलं देवि दिव्यं पदं वा

स्तोकप्रज्ञैरनबधिगुणा स्तूयसे सा कथं त्वम् ॥ ४

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामनितरगतिः स्तोतुमाशं समानः ।
सिद्धारम्भस्सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ५

यत्सङ्कल्पाद्भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रलयरचना जङ्गमाजङ्गमानाम् ।
तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजस्स्फुरति भवतीपादलाक्षारसाङ्कम् ॥ ६

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम् ।
शेषश्चित्तं विमलमनसां मौलयश्च श्रुतीनां
सम्पद्यन्ते विहरणविधौ यस्य शय्याविशेषाः ॥ ७

उद्देश्यत्वं जननि भजतोरू ज्झितोपाधिगन्धं

प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात् ।
पद्म पत्युस्तव च निगमैर्नित्यमन्विष्यमाणः
नावच्छेदं भजति महिमा नर्तयन मानसं नः ॥ ८

पश्यन्तीषु श्रुतिषु परितः सूरिवृन्देन सार्धं
मध्येकृत्यं त्रिगुणफलकं निर्मितस्थानभेदम् ।
विश्वाधीशंप्रणयिनी सदा विभ्रमद्युतवृत्तौ
ब्रह्मेशाद्या दधति युवयोरक्षशारप्रचारम् ॥ ९

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति ।
यन्नामानि श्रुतिपरिमला न्येवमावर्तयन्तो
नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे ॥ १०

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तः कलहमलिनैः किञ्चिदुत्तीर्य मग्नैः ।
त्वत्सम्प्रीत्यै विहरति हरौ सम्मुखीनां श्रुतीनां
भावारूढौ भगवति युवां दैवतं दम्पती नः ॥ ११

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य विष्णोः
आचख्युस्त्वां प्रियसहचरीमैकपत्योपपन्नाम् ।
प्रादुर्भावैरपि समतनुः प्राप्त मुन्नीयसे त्वं
दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ॥ १२

धत्ते शोभां हरिमरकते तावकी मूर्तिराद्या
तन्वी तुंगस्तनभरनता तप्तजाम्बूनदाभा ।
यस्यां गच्छन्त्युदयविलयैर्नित्यमानन्दसिन्धौ
उत्पद्यन्ते ललित लहरीविभ्रमं व्यक्तयस्ते ॥ १३

आसंसारं विततमखिलं वाङ्मयं यद्विभूति-
यद्भ्रूभङ्गात्कुसुमधनुषः किङ्करो मेरूधन्वा ।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मेतासां परिणतिरसौ भावलेशैस्त्वदीयैः॥ १४

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णां
अम्भोराशेरधिगतसुधासम्प्लवादुत्थितां त्वाम् ।

पुष्पासारस्थगितभुवनैः पुष्कलावर्तकाद्यैः
कृप्तारम्भाः कनककलशैरभ्यषिञ्चन् गजेन्द्राः ॥ १५

आलोक्य त्वाममृतसहजे विष्णुवक्षःस्थलस्थां
शापाक्रान्ताः शरणमगमन्सावरोधास्सुरेन्द्राः ।
लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः
सर्वाकार स्थिरसमुदयां सम्पदं निर्विशन्ति ॥ १६

आर्तत्राणव्रतिभिरमृतासारनीम्राम्बुवाहैः
अम्भोजानामुषसि मिषतामन्तरङ्गैरपाङ्गैः ।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते सम्पदोघाः ॥ १७

योगारम्भत्वरितमनसो युष्मदेकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्तेऽधना याम् ॥
तेषां भूमेर्धनपतिगृहा दम्बरा दम्बुधेर्वा
धारानिर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् ॥ १८

श्रेयस्कामा कमलनिलये चित्रमाम्नायवाचां
चूडापीठं तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छायासुभगशिरसश्चामरस्मेर पार्श्वा
श्लाघाशब्दश्रवणमुदिताः स्रग्विणस् सञ्चरन्ति ॥१९

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
दूरीकर्तुं दुरितनिवहं त्यक्तुमाद्यामविद्याम् ।
अम्ब स्तम्बावधिकजननग्रामसीमान्तरेखां
आलम्बन्ते विमलमनसो विष्णुकान्ते दयान्ते ॥२०

जाताकाङ्क्षा जननि युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गप्रशमनफलं वैदिक धर्मसेतुम् ॥ २१

सेवे देवि त्रिदशमहिलामौलिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां सम्पदां पादपद्मम् ।
यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं

वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २२

सानुप्रासप्रकटितदयै सान्द्रवात्सल्यदिग्धैः
अम्बस्निग्धैरमृतलहरीलब्धसद्ब्रह्मचर्यैः ।
घर्मे तापत्रयविरचिते गाढतप्तं क्षणं मां
आकिञ्चन्यग्लपितमनघैरार्द्रयेथाः कटाक्षैः ॥२३

सम्पद्यन्ते भवभयतमीभानवस्त्वत्प्रसादा-
द्भावास् सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतश् शीतलोदारशीलाम्
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥२४

माता देवि त्वमसि कमले वासुदेवः पिता मे
जातस् सोऽहं जननि युवयोरेकलक्ष्यं दयायाः ।
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥ २५

कल्याणानामविकलनिधिः काऽपि कारुण्यसीमा

नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
सम्पद्दिव्या मधुविजयिनः सन्निधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः ॥ २६

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्
कलि- कलुषनिवृत्त्यै कल्पमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः
सकलकुशलसीमा सार्वभौमा भवन्ति ॥ २७

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥२८

॥ इति श्रीमद्वेदान्तदेशिकविरचिता कनकधारास्तुतिः समाप्ता ॥

वक्त्राब्जे भाग्यलक्ष्मीः करतलकमले सर्वदातारलक्ष्मीः
दोर्दण्डे वीरलक्ष्मीर्हृदयसरसिजे भूतकारुण्यलक्ष्मीः ।
संग्रामे शौर्यलक्ष्मीर्निखिलगुणगणाडम्बरे कीर्तिलक्ष्मीः
सर्वाङ्गे सौम्यलक्ष्मीर्मम सुविजयतां सर्वसाम्राज्यलक्ष्मीः ॥

सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मीर्नमोऽस्तुते ॥